# सुन्दरकाण्ड एकोनत्रिंशः सर्गः (२९) - ॥ शुभनिमित्तानि ॥

तथागतां तां व्यथिता मनिन्दितां
व्यपेत हर्षां परिदीन मानसाम् ।
शुभां निमित्तानि शुभानि भेजिरे
नरं श्रिया जुष्ट मिवोप जीविनः ॥ १ ॥

तस्याः शुभं वाम मरालपक्ष्म-
-राजी वृतं कृष्ण विशाल शुक्लम् ।
प्रास्पन्द तैकं नयनं सुकेश्या
मीनाहतं पद्म मिवाभि ताम्रम् ॥ २ ॥

भुजश्च चार्वञ्चितपीनवृत्तः
परार्ध्य कालागरु चन्दनार्हः ।
अनुत्तमे नाध्युषितः प्रियेण
चिरेण वामः सम वेपताशु ॥ ३ ॥

गजेन्द्र हस्त प्रतिमश्च पीनः
तयोर् दयोः संहतयोः सुजातः ।
प्रस्पन्दमानः पुनरूरु रस्या
रामं पुरस्तात् स्थित माचचक्षे ॥ ४ ॥

शुभं पुनर्हेम समान वर्णः
ईषद् रजोध्वस्त मिवा मलाक्ष्याः ।
वासः स्थितायाः शिखराग्र दत्याः
किञ्चित् परिस्रंसत चारु गात्र्याः ॥ ५ ॥

एतैर् निमित्तैरपरैश्च सुभ्रूः
सम्बो धिता प्रागपि साधु सिद्धैः ।
वातातप क्लान्त मिव प्रनष्टं
वर्षेण बीजं प्रति सञ्जहर्ष ॥ ६ ॥

तस्याः पुनर्बिम्ब फला धरोष्ठं
स्वक्षिभ्रु केशान्त मराल पक्ष्म ।
वक्त्रं बभासे सितशुक्ल दंष्ट्रं
राहोर् मुखाच्चन्द्र इव प्रमुक्तः ॥ ७ ॥

सा वीतशोका व्यपनीत तन्द्री
शान्त ज्वरा हर्ष विवृद्ध सत्त्वा ।
अशोभतार्या वदनेन शुक्ले
शीतांशुना रात्रि रिवोदितेन ॥ ८ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥